**B**

**SL. No. : Q**

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 46 ]
Total No. of Questions : 46 ]

**CCE RR**
**UN-REVISED**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 67-S** **Code No. : 67-S**

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : Third Language — SANSKRIT
# तृतीय भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**

**( ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Repeater )**

ದಿನಾಂಕ : 28. 06. 2018 ] [ Date : 28. 06. 2018

ಸಮಯ : ಬೆಳಿಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-00 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-00 Noon

ಗರಿಷ್ಠ ಅಂಕಗಳು : 80 ] [ Max. Marks : 80

***ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 46 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

***छात्रं प्रति सामान्यनियमाः***

1. अस्मिन् प्रश्नपत्रे षट्चत्वारिंशत् (46) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तय । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति पर्यालोचय ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकतयाः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारिता समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । यस्मिन् पञ्चदशपलानि प्रश्नपत्रस्य पठनार्थं निर्धारितानि सन्ति ।



इतः कर्तय

**TEAR HERE TO OPEN THE QUESTION PAPER**
**प्रश्नपत्रमुद्घाटयितुमितः कर्तय**

**Tear here**

## भागः - A

### ( गद्यम्-पद्यम्-पूरकपाठः )

I. एकवाक्येन उत्तरं लिखत — 10 × 1 = 10

1. का जनकेन सह पुस्तकमेलां गतवती ?
2. मेलुकोटे कस्मिन् मण्डले अस्ति ?
3. विवेकानन्दस्य शिष्यः कः ?
4. विशिष्टाद्वैत सिद्धान्तप्रतिपादक कः ?
5. कतिविधाः जनाः देवं भजन्ते ?
6. कः इन्दुः क्षीरनिधाविव प्रसूतः ?
7. कालपर्ययात् का क्षयं गच्छति ?
8. सन्तः कान् पर्वतीकुर्वन्ति ?
9. पूज्यनदी का ?
10. भिन्नौ कौ ?

II. संयोज्य लिखत — 4 × 1 = 4

| अ | आ |
|---|---|
| 11. जानकी | a) नाटकम् |
| 12. अभिज्ञानशाकुन्तलम् | b) सीता |
| 13. पार्थः | c) निधिः |
| 14. मित्रसङ्ग्रहः | d) पादपाः |
| | e) अर्जुनः |
| | f) नकुलः । |

III. **द्वित्रैः** वाक्यैः संस्कृतभाषया उत्तरं लिखत – 2 × 2 = 4

15. विश्वसंस्कृतपुस्तकमेलायां के के अंशाः आसन् ?

**अथवा**

पुस्तकमेलायाः वेदिकायां के कार्यक्रमाः आसन् ।

16. रघुवंशीयराजाः कथम् आसन् ?

IV. श्लोकतात्पर्यं कन्नडभाषया आङ्ग्लभाषया वा लिखत – 2 × 2 = 4

17. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

मा कर्म फलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।

18. भारतवासिषु बाह्ये भेदे

बहुत्र बहुधा दृष्टेऽपि ।

आन्तरङ्गिकी संस्कृतिरेका

सनातनी नो बध्नाति ।।

**अथवा**

अशनं भिन्नं वसनं भिन्नं

रूपं भिन्नं रीतिरपि ।

भिन्नं भाग्यं भिन्नो वर्णः

भिन्नं सर्वं भेददृशे ।।

V. संस्कृतभाषया अनुवादं कुरुत – 2

19. ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರತಿದಿನ ದೇವಾಲಯಕ್ಕೆ ಹೋಗುತ್ತಾರೆ. ಎಲ್ಲರೂ ಅಲ್ಲಿ ಪ್ರಾರ್ಥನೆಯನ್ನು ಮಾಡುತ್ತಾರೆ.

कर्नाटकभाषया अनुवादं कुरुत – 2

20. वयं प्रतिदिनं शालां गच्छामः ।

तत्र संस्कृतमपि पठामः ।

VI. कवेः देश-काल-ग्रन्थानां विषये लिखत – 3

21. कालिदासः ।

**अथवा**

भोजराजः ।

VII. यथानिर्देशम् उत्तरं लिखत – $2 \times 3 = 6$

22. "गच्छ अद्य अहं पुस्तकं न दास्यामि ।"

कः पाठः ? कः अवदत् ? कम् अवदत् ?

23. "स्पृहयामि खलु दुर्ललितायाम् अस्मै ।"

कः पाठः ? कः अवदत् ? कम् अवदत् ?

VIII. कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा उत्तरं लिखत – $3 \times 3 = 9$

24. कृष्णेन अर्जुनस्य मिथ्याभिमानः कथं खण्डितः ?

25. राजा विक्रमस्य औदार्यं कथं ज्ञातवान् ?

26. शुकनासस्य उपदेशसारं लिखत ।

**अथवा**

'धूर्तो न सेव्यः' पाठस्य कथा सारांशं लिखत ।

IX. श्लोकं पूरयत – 4

27. गुरवे ..........................................................................................

..........................................................................................।

..........................................................................................

.......................................................................... मूर्तये नमः ॥

## भागः - B

### ( व्याकरणविभागः )

X. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत । 12 × 1 = 12

28. 'इन्दुः' एतस्य पर्यायपदम् इदं भवति –

(A) चन्द्रः (B) सूर्यः

(C) गुरुः (D) शिवः ।

29. 'बालस्तत्र' अत्र अयं सन्धिः भवति –

(A) गुणसन्धिः (B) पूर्वरूप सन्धिः

(C) श्चुत्व सन्धिः (D) विसर्ग सन्धिः ।

30. 'वेदाद्रिः' अत्र पदच्छेदः एवं भवति –

(A) वेद + अद्रिः (B) वेदा + अद्रिः

(C) वेद + द्रिः (D) वेद + दाद्रिः ।

31. 'आदरः' एतस्य विरुद्धार्थकं पदम् इदं भवति –

(A) मन्दरः (B) सोदरः

(C) अनादरः (D) उदरः ।

32. 'ज्योतिर्गमय' अत्र सन्धि विभजनम् एवं भवति –

(A) ज्योति + गमय (B) ज्योतिः + गमय

(C) ज्योतिर् + गमय (D) ज्योतिस् + गमय ।

33. "भविष्यन्ति" अस्य एकवचन रूपम् इदं भवति –

(A) भविष्यति (B) भविष्यतः

(C) भविष्यथ (D) भविष्यामः ।

34. अत्र समूहेतरपदं लिखत –

(A) रघुवंशः (B) कुमारसम्भवम्

(C) मेघदूतम् (D) भगवद्गीता ।

35. 'प्रतिदिनम्' अत्र अयं समासः अस्ति –

(A) द्वन्द्वः (B) अव्ययीभावः

(C) द्विगुः (D) बहुव्रीहिः ।

36. 'शूलपाणिः' अस्य विग्रहवाक्यम् एवं भवति –

(A) शूलं पाणौ यस्य सः (B) शूलं पाणिः यस्य सः

(C) शूलं पाणिं यस्य सः (D) शूलं पाणिना यस्य सः ।

37. शुद्धं रूपं लिखत –

(A) राजा रामानुजाचार्यं प्रार्थितवान् (B) राजा रामानुजाचार्यं प्रार्थितवन्तौ

(C) राजा रामानुजाचार्यं प्रार्थितवती (D) राजा रामानुजाचार्यं प्रार्थितवन्तः ।

38. 'गच्छति' अत्र एषः लकारः अस्ति –

(A) लृट् (B) लिट्

(C) लट् (D) लोट् ।

39. 'उपकारः' अत्र एषा विभक्तिः अस्ति –

(A) प्रथमा (B) द्वितीया

(C) तृतीया (D) चतुर्थी ।

XI. चतुर्थपदं लिखत – 2 × 1 = 2

40. i) विनतायाः अपत्यं पुमान् – वैनतेयः । गङ्गायाः अपत्यं पुमान् – .......................... ।

ii) अर्हस्य भावः – अर्हता । निपुणस्य भावः – .......................... ।

कृदन्तपदं चित्वा लिखत – 2 × 1 = 2

41. i) अहं पत्रं लिखन् अस्मि ।

ii) शिवेन लोकः रक्षितः ।

## भागः - C

### ( रचनाविभागः )

XII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत – 2

42. "करारविन्देन पदारविन्दम् ।"

XIII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत – 2

43. "सीतां विचेतुं पथि चारणानाम् ।"

XIV. पत्रं लिखत – 4

44. दिनद्वयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विराम पत्रं लिखत ।

**अथवा**

अध्ययन विषये मित्रं प्रति पत्रं लिखत ।

XV. प्रबन्धं लिखत – 4

45. सङ्गणकयन्त्रम् ।

**अथवा**

परिसरः ।

XVI. गद्यभागं पठित्वा प्रश्नानाम् उत्तरं लिखत – $4 \times 1 = 4$

46. आञ्जनेयः श्रीरामस्य भक्तः आसीत् । रावणः एकदा सीतायाः अपहरणं कृतवान् । तदा आञ्जनेयः सीतायाः अन्वेषणं कृतवान् । श्रीरामेण दत्तम् अङ्गुलीयकं सीतायै दत्तवान् । तदा सीता अतीव सन्तुष्टा । आञ्जनेयस्य 'मारुतिः' इति नामान्तरम् अपि अस्ति ।

i) आञ्जनेयः कस्य भक्तः आसीत् ?

ii) एकदा रावणः कस्याः अपहरणं कृतवान् ?

iii) आञ्जनेयः सीतायै किं दत्तवान् ?

iv) आञ्जनेयस्य किं नामान्तरम् अस्ति ?